॥ श्री नरसिंह स्तुतिः॥

उदयरवि सहस्रद्योतितं रूक्षवीक्षं प्रळय जलधिनादं कल्पकृद्वह्नि वक्त्रम् ।
सुरपतिरिपु वक्षश्छेद रक्तोक्षिताङ्गं प्रणतभयहरं तं नारसिंहं नमामि॥

प्रळयरवि कराळाकार रुक्चक्रवालं विरळय दुरुरोची रोचिताशान्तराल ।
प्रतिभयतम कोपात्त्युत्कटोच्चाट्टहासिन् दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १॥

सरस रभसपादा पातभाराभिराव प्रचकितचल सप्तद्वन्द्व लोकस्तुतत्त्वम् ।
रिपुरुधिर निषेकेणैव शोणाङ्घ्रिशालिन् दह दह नरसिंहासह्यवीर्याहितंमे ॥ २॥

तव घनघनघोषो घोरमाघ्राय जङ्घा परिघमलघु मूरु व्याजतेजो गिरिञ्च ।
घनविघटतमागाद्दैत्य जङ्घालसङ्घो दह दह नरसिंहासह्यवीर्याहितंमे ॥ ३॥

कटकि कटकराजद्भाट्ट काग्र्यस्थलाभा प्रकट पट तटित्ते सत्कटिस्थातिपट्वी ।
कटुक कटुक दुष्टाटोप दृष्टिप्रमुष्टौ दह दह नरसिंहासह्यवीर्याहितंमे ॥ ४॥

प्रखर नखर वज्रोत्खात रोक्षारिवक्षः शिखरि शिखर रक्तयराक्तसन्दोह देह ।
सुवलिभ शुभ कुक्षे भद्र गम्भीरनाभे दह दह नरसिंहासह्यवीर्याहितम्मे ॥ ५॥

स्फुरयति तव साक्षात् सैव नक्षत्रमाला क्षपित दितिज वक्षो व्याप्तनक्षत्रमार्गम् ।
अरिदरधर जान्वासक्त हस्तद्वयाहो दह दह नरसिंहासह्यवीर्याहितम्मे ॥ ६॥

कटुविकट सटौघोद्घट्टनादभ्रष्टभूयो घनपटल विशालाकाश लब्धावकाशम् ।
करपरिघ विमर्द प्रोद्यमं ध्यायतस्ते दह दह नरसिंहासह्यवीर्याहितम्मे ॥ ७॥

हठलुठ दल घिष्टोत्कण्ठदष्टोष्ठ विद्युत् सटशठ कठिनोरः पीठभित्सुष्ठुनिष्ठाम् ।
पठतिनुतव कण्ठाधिष्ठ घोरान्त्रमाला दह दह नरसिंहासह्यवीर्याहितम्मे ॥ ८॥

हृत बहुमिहिराभासह्यसंहाररंहो हुतवह बहुहेति हेपिकानन्त हेति ।

अहित विहित मोहं संवहन् सैंहमास्यम् दह दह नरसिंहासह्यवीर्याहितम्मे ॥ ९ ॥

गुरुगुरुगिरिराजत्कन्दरान्तर्गतेव दिनमणि मणिशृङ्गे वन्तवह्निप्रदीप्ते ।
दधदति कटुदंष्ट्रे भीषणोज्जिह्व वक्त्रे दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १० ॥

अधरित विबुधाब्धि ध्यानधैर्यं विदीध्य द्विविध विबुधधी श्रद्धापितेन्द्रारिनाशम् ।
विदधदति कटाहोह्यट्टनेद्धाट्टहासं दह दह नरसिंहासह्यवीर्याहितम्मे ॥ ११ ॥

त्रिभुवन तृणमात्र त्राण तृष्णन्तु नेत्र त्रयमति लघितार्चिर्विष्ट पाविष्टपादम् ।
नवतर रवि ताम्रं धारयन् रूक्षवीक्षं दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १२ ॥

भ्रमद भिभव भूभृङ्गरिभूभारसङ्गिद् भिदनभिनव विदभ्र विभ्र मादभ्र शुभ्र ।
ऋभुभव भय भेत्तर्भासि भो भो विभाभिर्दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १३ ॥

श्रवण खचित चञ्चत्कुण्ड लोच्चण्डगण्ड भ्रुकुटि कटुललाट श्रेष्ठनासारुणोष्ठ ।
वरद सुरद राजत्केसरोत्सारि तारे दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १४ ॥

प्रविकच कचराजद्रत्न कोटीरशालिन् गलगत गलदुस्रोदार रत्नाङ्गदाढ्य ।
कनक कटक काञ्ची शिञ्जिनी मुद्रिकावन् दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १५ ॥

अरिदरमसि खेटौ बाणचापे गदां सन्मुसलमपि दधानः पाशवर्याङ्कुशौ च ।
करयुगल धृतान्त्रस्रग्विभिन्नारिवक्षो दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १६ ॥

चट चट चट दूरं मोहय भ्रामयारिन् कडि कडि कडि कायं ज्वारय स्फोटयस्व ।
जहि जहि जहि वेगं शात्रवं सानुबन्धं दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १७ ॥

विधिभव विबुधेश भ्रामकाग्नि स्फुलिङ्ग प्रसवि विकट दंष्ट्रोज्जिह्वक्त्र त्रिनेत्र ।
कल कल कलकामं पाहिमां तेसुभक्तं दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १८ ॥

कुरु कुरु करुणां तां साङ्कुरां दैत्यपूते दिश दिश विशदाम्मे शाश्वतीं देवदृष्टिम् ।
जय जय जय मुर्तेऽनार्त जेतव्य पक्षं दह दह नरसिंहासह्यवीर्याहितम्मे ॥ १९ ॥

स्तुतिरिहमहितघ्नी सेवितानारसिंही तनुरिवपरिशान्ता मालिनी साऽभितोऽलम् ।
तदखिल गुरुमाग्य श्रीधरूपालसङ्गिः सुनिय मनय कृत्यैः सद्गुणैर्नित्ययुक्ताः ॥ २० ॥

लिकुच तिलकसूनुः सद्धितार्थानुसारी नरहरि नुतिमेतां शत्रुसंहार हेतुम् ।
अकृत सकल पापध्वंसिनीं यः पठेत् तां व्रजति नृहरिलोकं कामलोभाद्यसक्तः ॥ २१॥

इति कविकुलतिलक श्री त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्य विरचितम् श्री नरसिंह स्तुतिः संपूर्णम्

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥